# सर्वे भवन्तु धनिनः

**शास्त्रपरम्परोत्कर्षं युवानः कर्तुमुद्यताः।**

**तदर्थं वेदिका ह्येषा कल्पिता शास्त्रवर्धिनी ।।**



शास्त्रोत्सवे अर्थात् अखिलभारतीयशास्त्रीयप्रतियोगितायां विदुषां सम्माननाय प्रातिभानां पुरस्काराय कलावैभवस्य प्रदर्शनाय च सन्ध्याकालः (१९/०३/२०२५) सुनिश्चितः।

गुरुकुलात् राष्ट्रस्तरपर्यन्तं विविधस्पर्धाः सम्मुखीकृत्य तत्र विजयमवाप्य समागतानां प्रातिभानां च  सत्काराय योगगुरवः उत्सुकाः सन्ति इति वरखेडीवर्याः प्रास्ताविके भाषणे अवोचन्।

सर्वेऽपि प्रथमस्थानं प्राप्यैव अत्र आगताः। अतः सर्वेषां ५१०० रूप्यकैः सह सत्कारं कुर्मः इति आचार्यबालकृष्णवर्याः सभामुखमवोचन्। तदग्रे वीरसंन्यासी इव पूज्याः रामदेववर्याः अभाषन्त। गुरुकुलच्छात्राः अद्य विश्वनायकाः सर्वपूज्याः  भवितुमर्हन्ति इत्यत्र अहमेव प्रत्यक्षम् उदाहरणम् अस्मि।




मया अष्टाध्यायी अधीता। तद्बलेन दिनद्वये शेयर मार्केट् विषये परिज्ञानं प्राप्तम्। राजनीतिः विज्ञाता। समाजस्य सर्वाणि अङ्गानि क्षेत्राणि च विज्ञातानि। अन्ते भारतीयः एकोऽपि संस्कृतज्ञः निरुद्योगी न स्यात् इत्येव अस्माकं प्रयासः सङ्कल्पः च वर्तते इत्यवदन्। सर्वे भवन्तु धनिनः इति समन्दहासं वदन्तः



मञ्चस्थान् सर्वान् वरिष्ठान् निर्णायकान् च स्वामिनः कुलपतिप्रमुखाः च धनवस्त्रफलपुस्तक-मालादिभिः सत्कृतवन्तः। त्रिषष्टिसङ्ख्याकाः निर्णायकाः

सर्वराज्येभ्यः समागताः मार्गदर्शकाः समायोजकाः इत्येवं सर्वेऽपि सत्कृताः। अन्ते पतञ्जलिविश्वविद्यालयस्य प्रतिभाशालिभिः छात्रैः योगवैभवम् नृत्यवैभवं च सुष्ठु प्रदर्शितम्। युवतीनां कलावैभवं दर्शं दर्शं सर्वे प्रेक्षकाः अमन्दमानन्दमन्वभवन्।





**शास्त्रोत्सवसारसङ्ग्रहः**

आचार्यगणेशतिम्मण्णपण्डितः

स्पर्धासंयोजकः

श्री श्रीशसमीरः के एस्

**श्री निखिलः**